# Mandukyopanishat with Karika by Gaudapada

# માણ્ડૂક્યોપનિષત્ કારિકાસહિતા

## Document Information

Text title : maaNDuukyopanishhat.h kaarikaa

File name : kaarikaa.itx

Category : upanishhat, svara, gauDapaada

Location : doc_upanishhat

Author : gauDapaada

Transliterated by : Anshuman Pandey pandey at umich.edu M. Giridhar, Kim Poulsen (poulsen at dk-online.dk).

Proofread by : Aikya Param (aikya at ix.netcom.com), David Lyttle dhlyttle at hotmail.com

Description-comments : four prakaraNas or treatises explaining the

Latest update : July 14, 2006. July 1, 2011

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# માણ્ડૂક્યોપનિષત્ કારિકાસહિતા

। સગૌડપાદીયકારિકાથર્વવેદીયમાણ્ડૂક્યોપનિષત્ ।

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

ભદ્રં નો અપિ વાતય મનઃ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

હરિઃ ૐ । ૐ ઇત્યેતદક્ષરં ઇદꣳ સર્વં તસ્યોપવ્યાખ્યાનં
ભૂતં ભવદ્ ભવિષ્યદિતિ સર્વમોંકાર એવ ।
યચ્ચાન્યત્ ત્રિકાલાતીતં તદપ્યોંકાર એવ ॥ ૧॥

સર્વꣳ હ્યેતદ્ બ્રહ્માયમાત્મા બ્રહ્મ સોઽયમાત્મા ચતુષ્પાત્ ॥ ૨॥

જાગરિતસ્થાનો બહિષ્પ્રજ્ઞઃ સપ્તાઙ્ગ એકોનવિંશતિમુખઃ
સ્થૂલભુગ્વૈશ્વાનરઃ પ્રથમઃ પાદઃ ॥ ૩॥

સ્વપ્નસ્થાનોઽન્તઃપ્રજ્ઞઃ સપ્તાઙ્ગ એકોનવિંશતિમુખઃ
પ્રવિવિક્તભુક્તૈજસો દ્વિતીયઃ પાદઃ ॥ ૪॥

યત્ર સુપ્તો ન કઞ્ચન કામં કામયતે ન કઞ્ચન સ્વપ્નં પશ્યતિ
તત્ સુષુપ્તમ્ । સુષુપ્તસ્થાન એકીભૂતઃ પ્રજ્ઞાનઘન
એવાનન્દમયો હ્યાનન્દભુક્ ચેતોમુખઃ પ્રાજ્ઞસ્તૃતીયઃ પાદઃ ॥ ૫॥

એષ સર્વેશ્વરઃ એષ સર્વજ્ઞ એષોઽન્તર્યામ્યેષ યોનિઃ
સર્વસ્ય પ્રભવાપ્યયૌ હિ ભૂતાનામ્ ॥ ૬॥

અત્રૈતે શ્લોકા ભવન્તિ

બહિષ્પ્રજ્ઞો વિભુર્વિશ્વો હ્યન્તઃપ્રજ્ઞસ્તુ તૈજસઃ ।
ઘનપ્રજ્ઞસ્તથા પ્રાજ્ઞ એક એવ ત્રિધા સ્મૃતઃ ॥ ૧॥

દક્ષિણાક્ષિમુખે વિશ્વો મનસ્યન્તસ્તુ તૈજસઃ ।
આકાશે ચ હૃદિ પ્રાજ્ઞસ્ત્રિધા દેહે વ્યવસ્થિતઃ ॥ ૨॥

વિશ્વો હિ સ્થૂલભુઙ્નિત્યં તૈજસઃ પ્રવિવિક્તભુક્ ।
આનન્દભુક્ તથા પ્રાજ્ઞસ્ત્રિધા ભોગં નિબોધત ॥ ૩॥

સ્થૂલં તર્પયતે વિશ્વં પ્રવિવિક્તં તુ તૈજસમ્ ।
આનન્દશ્ચ તથા પ્રાજ્ઞં ત્રિધા તૃપ્તિં નિબોધત ॥ ૪॥

ત્રિષુ ધામસુ યદ્ભોજ્યં ભોક્તા યશ્ચ પ્રકીર્તિતઃ ।
વેદૈતદુભયં યસ્તુ સ ભુઞ્જાનો ન લિપ્યતે ॥ ૫॥

પ્રભવઃ સર્વભાવાનાં સતામિતિ વિનિશ્ચયઃ ।
સર્વં જનયતિ પ્રાણશ્ચેતોંऽશૂન્પુરુષઃ પૃથક્ ॥ ૬॥

વિભૂતિં પ્રસવં ત્વન્યે મન્યન્તે સૃષ્ટિચિન્તકાઃ ।
સ્વપ્નમાયાસરૂપેતિ સૃષ્ટિરન્યૈર્વિકલ્પિતા ॥ ૭॥

ઇચ્છામાત્રં પ્રભોઃ સૃષ્ટિરિતિ સૃષ્ટૌ વિનિશ્ચિતાઃ ।
કાલાત્પ્રસૂતિં ભૂતાનાં મન્યન્તે કાલચિન્તકાઃ ॥ ૮॥

ભોગાર્થં સૃષ્ટિરિત્યન્યે ક્રીડાર્થમિતિ ચાપરે ।
દેવસ્યૈષ સ્વભાવોऽયમાપ્તકામસ્ય કા સ્પૃહા ॥ ૯॥

—————————————-

નાન્તઃપ્રજ્ઞં ન બહિષ્પ્રજ્ઞં નોભયતઃપ્રજ્ઞં
ન પ્રજ્ઞાનઘનં ન પ્રજ્ઞં નાપ્રજ્ઞમ્ ।
અદૃષ્ટમવ્યવહાર્યમગ્રાહ્યમલક્ષણં
અચિન્ત્યમવ્યપદેશ્યમેકાત્મપ્રત્યયસારં
પ્રપઞ્ચોપશમં શાન્તં શિવમદ્વૈતં ચતુર્થં મન્યન્તે
સ આત્મા સ વિજ્ઞેયઃ ॥ ૭॥

અત્રૈતે શ્લોકા ભવન્તિ

નિવૃત્તેઃ સર્વદુઃખાનામીશાનઃ પ્રભુરવ્યયઃ ।
અદ્વૈતઃ સર્વભાવાનાં દેવસ્તુર્યો વિભુઃ સ્મૃતઃ ॥ ૧૦॥

કાર્યકારણબદ્ધૌ તાવિષ્યેતે વિશ્વતૈજસૌ ।
પ્રાજ્ઞઃ કારણબદ્ધસ્તુ દ્વૌ તૌ તુર્યે ન સિધ્યતઃ ॥ ૧૧॥

નાઽઽત્માનં ન પરાંશ્ચૈવ ન સત્યં નાપિ ચાનૃતમ્ ।
પ્રાજ્ઞઃ કિઞ્ચન સંવેત્તિ તુર્યં તત્સર્વદૃક્સદા ॥ ૧૨॥

દ્વૈતસ્યાગ્રહણં તુલ્યમુભયોઃ પ્રાજ્ઞતુર્યયોઃ ।
બીજનિદ્રાયુતઃ પ્રાજ્ઞઃ સા ચ તુર્યે ન વિદ્યતે ॥ ૧૩॥

સ્વપ્નનિદ્રાયુતાવાદ્યૌ પ્રાજ્ઞસ્ત્વસ્વપ્નનિદ્રયા ।
ન નિદ્રાં નૈવ ચ સ્વપ્નં તુર્યે પશ્યન્તિ નિશ્ચિતાઃ ॥ ૧૪॥

અન્યથા ગૃહ્ણતઃ સ્વપ્નો નિદ્રા તત્ત્વમજાનતઃ ।
વિપર્યાસે તયોઃ ક્ષીણે તુરીયં પદમશ્નુતે ॥ ૧૫॥

અનાદિમાયયા સુપ્તો યદા જીવઃ પ્રબુધ્યતે ।
અજમનિદ્રમસ્વપ્નમદ્વૈતં બુધ્યતે તદા ॥ ૧૬॥

પ્રપઞ્ચો યદિ વિદ્યેત નિવર્તેત ન સંશયઃ ।
માયામાત્રમિદં દ્વૈતમદ્વૈતં પરમાર્થતઃ ॥ ૧૭॥

વિકલ્પો વિનિવર્તેત કલ્પિતો યદિ કેનચિત્ ।
ઉપદેશાદયં વાદો જ્ઞાતે દ્વૈતં ન વિદ્યતે ॥ ૧૮॥

——————————————-

સોઽયમાત્માઽધ્યક્ષરમોંકારોઽધિમાત્રં પાદા
માત્રા માત્રાશ્ચ પાદા અકાર ઉકારો મકાર ઇતિ ॥ ૮॥

જાગરિતસ્થાનો વૈશ્વાનરોઽકારઃ પ્રથમા
માત્રાઽઽપ્તેરાદિમત્ત્વાદ્ વાઽઽપ્નોતિ હ વૈ સર્વાન્
કામાનાદિશ્ચ ભવતિ ય એવં વેદ ॥ ૯॥

સ્વપ્નસ્થાનસ્તૈજસ ઉકારો દ્વિતીયા માત્રોત્કર્ષાદ્
ઉભયત્વાદ્વોત્કર્ષતિ હ વૈ જ્ઞાનસન્તતિં સમાનશ્ચ ભવતિ
નાસ્યાબ્રહ્મવિત્કુલે ભવતિ ય એવં વેદ ॥ ૧૦॥

સુષુપ્તસ્થાનઃ પ્રાજ્ઞો મકારસ્તૃતીયા માત્રા મિતેરપીતેર્વા
મિનોતિ હ વા ઇદꣳ સર્વમપીતિશ્ચ ભવતિ ય એવં વેદ ॥ ૧૧॥

અત્રૈતે શ્લોકા ભવન્તિ

વિશ્વસ્યાત્વવિવક્ષાયામાદિસામાન્યમુત્કટમ્ ।
માત્રાસમ્પ્રતિપત્તૌ સ્યાદાપ્તિસામાન્યમેવ ચ ॥ ૧૯॥

તૈજસસ્યોત્વવિજ્ઞાન ઉત્કર્ષો દૃશ્યતે સ્ફુટમ્ ।
માત્રાસમ્પ્રતિપત્તૌ સ્યાદુભયત્વં તથાવિધમ્ ॥ ૨૦ ॥

મકારભાવે પ્રાજ્ઞસ્ય માનસામાન્યમુત્કટમ્ ।
માત્રાસમ્પ્રતિપત્તૌ તુ લયસામાન્યમેવ ચ ॥ ૨૧ ॥

ત્રિષુ ધામસુ યત્તુલ્યં સામાન્યં વેત્તિ નિશ્ચિતઃ ।
સ પૂજ્યઃ સર્વભૂતાનાં વન્દ્યશ્ચૈવ મહામુનિઃ ॥ ૨૨ ॥

અકારો નયતે વિશ્વમુકારશ્ચાપિ તૈજસમ્ ।
મકારશ્ચ પુનઃ પ્રાજ્ઞં નામાત્રે વિદ્યતે ગતિઃ ॥ ૨૩ ॥

———————————————-

અમાત્રશ્ચતુર્થોઽવ્યવહાર્યઃ પ્રપઞ્ચોપશમઃ શિવોઽદ્વૈત
એવમોંકાર આત્મૈવ સંવિશત્યાત્મનાઽઽત્માનં ય એવં વેદ ॥ ૧૨ ॥

અત્રૈતે શ્લોકા ભવન્તિ

ઓંકારં પાદશો વિદ્યાત્પાદા માત્રા ન સંશયઃ ।
ઓંકારં પાદશો જ્ઞાત્વા ન કિઞ્ચિદપિ ચિન્તયેત્ ॥ ૨૪ ॥

યુઞ્જીત પ્રણવે ચેતઃ પ્રણવો બ્રહ્મ નિર્ભયમ્ ।
પ્રણવે નિત્યયુક્તસ્ય ન ભયં વિદ્યતે ક્વચિત્ ॥ ૨૫ ॥

પ્રણવો હ્યપરં બ્રહ્મ પ્રણવશ્ચ પરઃ સ્મૃતઃ ।
અપૂર્વોઽનન્તરોઽબાહ્યોઽનપરઃ પ્રણવોઽવ્યયઃ ॥ ૨૬ ॥

સર્વસ્ય પ્રણવો હ્યાદિર્મધ્યમન્તસ્તથૈવ ચ ।
એવં હિ પ્રણવં જ્ઞાત્વા વ્યશ્નુતે તદનન્તરમ્ ॥ ૨૭ ॥

પ્રણવં હીશ્વરં વિદ્યાત્સર્વસ્ય હૃદિ સંસ્થિતમ્ ।
સર્વવ્યાપિનમોઙ્કારં મત્વા ધીરો ન શોચતિ ॥ ૨૮ ॥

અમાત્રોઽનન્તમાત્રશ્ચ દ્વૈતસ્યોપશમઃ શિવઃ ।
ઓંકારો વિદિતો યેન સ મુનિર્નેતરો જનઃ ॥ ૨૯ ॥

ઇતિ માણ્ડૂક્યોપનિષદર્થાવિષ્કરણપરાયાંસુ
ગૌડપાદિયકારીકાયાંસુ પ્રથમમાગમપ્રકરણમ્ ॥ ૧ ॥

। ૐ તત્સત્ ।

ગૌડપાદીયકારિકાસુ વૈતથ્યાખ્યં દ્વિતીયં પ્રકરણમ્ ।

। હરિઃ ૐ ।

વૈતથ્યં સર્વભાવાનાં સ્વપ્ન આહુર્મનીષિણઃ ।
અન્તઃસ્થાનાત્તુ ભાવાનાં સંવૃતત્વેન હેતુના ॥ ૧॥

અદીર્ઘત્વાચ્ચ કાલસ્ય ગત્વા દેશાન્ન પશ્યતિ ।
પ્રતિબુદ્ધશ્ચ વૈ સર્વસ્તસ્મિન્દેશે ન વિદ્યતે ॥ ૨॥

અભાવશ્ચ રથાદીનાં શ્રૂયતે ન્યાયપૂર્વકમ્ ।
વૈતથ્યં તેન વૈ પ્રાપ્તં સ્વપ્ન આહુઃ પ્રકાશિતમ્ ॥ ૩॥

અન્તઃસ્થાનાત્તુ ભેદાનાં તસ્માજ્જાગરિતે સ્મૃતમ્ ।
યથા તત્ર તથા સ્વપ્ને સંવૃતત્વેન ભિદ્યતે ॥ ૪॥

સ્વપ્નજાગરિતસ્થાને હ્યેકમાહુર્મનીષિણઃ ।
ભેદાનાં હિ સમત્વેન પ્રસિદ્ધેનૈવ હેતુના ॥ ૫॥

આદાવન્તે ચ યન્નાસ્તિ વર્તમાનેઽપિ તત્તથા ॥

વિતથૈઃ સદૃશાઃ સન્તોઽવિતથા ઇવ લક્ષિતાઃ ॥ ૬॥

સપ્રયોજનતા તેષાં સ્વપ્ને વિપ્રતિપદ્યતે ।
તસ્માદાદ્યન્તવત્ત્વેન મિથ્યૈવ ખલુ તે સ્મૃતાઃ ॥ ૭॥

અપૂર્વં સ્થાનિધર્મો હિ યથા સ્વર્ગનિવાસિનામ્ ।
તાન્યં પ્રેક્ષતે ગત્વા યથૈવેહ સુશિક્ષિતઃ ॥ ૮॥

સ્વપ્નવૃત્તાવપિ ત્વન્તશ્ચેતસા કલ્પિતં ત્વસત્ ।
બહિશ્ચેતોગૃહીતં સદ્દૃષ્ટં વૈતથ્યમેતયોઃ ॥ ૯॥

જાગ્રદ્વૃત્તાવપિ ત્વન્તશ્ચેતસા કલ્પિતં ત્વસત્ ।
બહિશ્ચેતોગૃહીતં સદ્યુક્તં વૈતથ્યમેતયોઃ ॥ ૧૦॥

ઉભયોરપિ વૈતથ્યં ભેદાનાં સ્થાનયોર્યદિ ।
ક એતાન્બુધ્યતે ભેદાન્ કો વૈ તેષાં વિકલ્પકઃ ॥ ૧૧॥

કલ્પયત્યાત્મનાઽઽત્માનમાત્મા દેવઃ સ્વમાયયા
સ એવ બુધ્યતે ભેદાનિતિ વેદાન્તનિશ્ચયઃ ॥ ૧૨॥

વિકરોત્યપરાન્ભાવાનન્તશ્ચિત્તે વ્યવસ્થિતાન્ ।
નિયતાંશ્ચ બહિશ્ચિત્ત એવં કલ્પયતે પ્રભુઃ ॥ ૧૩॥

ચિત્તકાલા હિ યેઽન્તસ્તુ દ્વયકાલાશ્ચ યે બહિઃ ॥

કલ્પિતા એવ તે સર્વે વિશેષો નાન્યહેતુકઃ ॥ ૧૪॥

અવ્યક્તા એવ યેઽન્તસ્તુ સ્ફુટા એવ ચ યે બહિઃ ।
કલ્પિતા એવ તે સર્વે વિશેષસ્ત્વિન્દ્રિયાન્તરે ॥ ૧૫॥

જીવં કલ્પયતે પૂર્વં તતો ભાવાન્પૃથગ્વિધાન્ ।
બાહ્યાનાધ્યાત્મિકાંશ્ચૈવ યથાવિદ્યસ્તથાસ્મૃતિઃ ॥ ૧૬॥

અનિશ્ચિતા યથા રજ્જુરન્ધકારે વિકલ્પિતા ।
સર્પધારાદિભિર્ભાવૈસ્તદ્વદાત્મા વિકલ્પિતઃ ॥ ૧૭॥

નિશ્ચિતાયાં યથા રજ્જ્વાં વિકલ્પો વિનિવર્તતે ।
રજ્જુરેવેતિ ચાદ્વૈતં તદ્વદાત્મવિનિશ્ચયઃ ॥ ૧૮॥

પ્રાણાદિભિરનન્તૈશ્ચ ભાવૈરેતૈર્વિકલ્પિતઃ ।
માયૈષા તસ્ય દેવસ્ય યયા સમ્મોહિતઃ સ્વયમ્ ॥ ૧૯॥

પ્રાણ ઇતિ પ્રાણવિદો ભૂતાનીતિ ચ તદ્વિદઃ ।
ગુણા ઇતિ ગુણવિદસ્તત્ત્વાનીતિ ચ તદ્વિદઃ ॥ ૨૦॥

પાદા ઇતિ પાદવિદો વિષયા ઇતિ તદ્વિદઃ ।
લોકા ઇતિ લોકવિદો દેવા ઇતિ ચ તદ્વિદઃ ॥ ૨૧॥

વેદા ઇતિ વેદવિદો યજ્ઞા ઇતિ ચ તદ્વિદઃ ।
ભોક્તેતિ ચ ભોક્તૃવિદો ભોજ્યમિતિ ચ તદ્વિદઃ ॥ ૨૨॥

સૂક્ષ્મ ઇતિ સૂક્ષ્મવિદઃ સ્થૂલ ઇતિ ચ તદ્વિદઃ ।
મૂર્ત ઇતિ મૂર્તવિદોઽમૂર્ત ઇતિ ચ તદ્વિદઃ ॥ ૨૩॥

કાલ ઇતિ કાલવિદો દિશ ઇતિ ચ તદ્વિદઃ ।
વાદા ઇતિ વાદવિદો ભુવનાનીતિ તદ્વિદઃ ॥ ૨૪॥

મન ઇતિ મનોવિદો બુદ્ધિરિતિ ચ તદ્વિદઃ ।
ચિત્તમિતિ ચિત્તવિદો ધર્માધર્મૌ ચ તદ્વિદઃ ॥ ૨૫॥

પઞ્ચવિંશક ઇત્યેકે ષડ્વિંશ ચાપરે ।

એકત્રિંશક ઇત્યાહુરનન્ત ઇતિ ચાપરે ॥ ૨૬॥

લોકાઁ લ્લોકવિદઃ પ્રાહુરાશ્રમા ઇતિ તદ્વિદઃ ।
સ્ત્રીપુંનપુંસકં લૈઙ્ગાઃ પરાપરમથાપરે ॥ ૨૭॥

સૃષ્ટિરિતિ સૃષ્ટિવિદો લય ઇતિ ચ તદ્વિદઃ ।
સ્થિતિરિતિ સ્થિતિવિદઃ સર્વે ચેહ તુ સર્વદા ॥ ૨૮॥

યં ભાવં દર્શયેદ્યસ્ય તં ભાવં સ તુ પશ્યતિ ।
તં ચાવતિ સ ભૂત્વાऽસૌ તદ્ગ્રહઃ સમુપૈતિ તમ્ ॥ ૨૯॥

એતૈરેષોऽપૃથગ્ભાવૈઃ પૃથગેવેતિ લક્ષિતઃ ।
એવં યો વેદ તત્ત્વેન કલ્પયેત્સોऽવિશઙ્કિતઃ ॥ ૩૦॥

સ્વપ્નમાયે યથા દૃષ્ટે ગન્ધર્વનગરં યથા ।
તથા વિશ્વમિદં દૃષ્ટં વેદાન્તેષુ વિચક્ષણૈઃ ॥ ૩૧॥

ન નિરોધો ન ચોત્પત્તિર્ન બદ્ધો ન ચ સાધકઃ ।
ન મુમુક્ષુર્ન વૈ મુક્ત ઇત્યેષા પરમાર્થતા ॥ ૩૨॥

ભાવૈરસદ્ભિરેવાયમદ્વયેન ચ કલ્પિતઃ ।
ભાવા અપ્યદ્વયેનૈવ તસ્માદદ્વયતા શિવા ॥ ૩૩॥

નાऽऽત્મભાવેન નાનેદં ન સ્વેનાપિ કથઞ્ચન ।
ન પૃથઙ્નાપૃથક્કિઞ્ચિદિતિ તત્ત્વવિદો વિદુઃ ॥ ૩૪॥

વીતરાગભયક્રોધૈર્મુનિભિર્વેદપારગૈઃ ।
નિર્વિકલ્પો હ્યયં દૃષ્ટઃ પ્રપઞ્ચોપશમોऽદ્વયઃ ॥ ૩૫॥

તસ્માદેવં વિદિત્વૈનમદ્વૈતે યોજયેત્સ્મૃતિમ્ ।
અદ્વૈતં સમનુપ્રાપ્ય જડવલ્લોકમાચરેત્ ॥ ૩૬॥

નિસ્તુતિર્નિર્નમસ્કારો નિઃસ્વધાકાર એવ ચ ।
ચલાચલનિકેતશ્ચ યતિર્યાદૃચ્છિકો ભવેત્ ॥ ૩૭॥

તત્ત્વમાધ્યાત્મિકં દૃષ્ટ્વા તત્ત્વં દૃષ્ટ્વા તુ બાહ્યતઃ ।
તત્ત્વીભૂતસ્તદારામસ્તત્ત્વાદપ્રચ્યુતો ભવેત્ ॥ ૩૮॥

ઇતિ ગૌડપાદીયકારિકાસુ વૈતથ્યાખ્યં દ્વિતીયં પ્રકરણમ્ ॥ ૨॥

ૐ ॥ ઉપાસાનાશ્રિતો ધર્મો જાતે બ્રહ્મણિ વર્તતે ।

પ્રાગુત્પત્તેરજં સર્વં તેનાસૌ કૃપણઃ સ્મૃતઃ ॥ ૧॥

અતો વક્ષ્યામ્યકાર્પણ્યમજાતિ સમતાં ગતમ્ ।
યથા ન જાયતે કિઞ્ચિજ્જાયમાનં સમન્તતઃ ॥ ૨॥

આત્મા હ્યાકાશવજ્જીવૈર્ઘટાકાશૈરિવોદિતઃ ।
ઘટાદિવચ્ચ સઙ્ઘાતૈર્જાતાવેતન્નિદર્શનમ્ ॥ ૩॥

ઘટાદિષુ પ્રલીનેષુ ઘટાકાશાદયો યથા ।
આકાશે સમ્પ્રલીયન્તે તદ્વજ્જીવા ઇહાઽઽત્મનિ ॥ ૪॥

યથૈકસ્મિન્ઘટાકાશે રજોધૂમાદિભિર્યુતે ।
ન સર્વે સમ્પ્રયુજ્યન્તે તદ્વજ્જીવાઃ સુખાદિભિઃ ॥ ૫॥

રૂપકાર્યસમાખ્યાશ્ચ ભિદ્યન્તે તત્ર તત્ર વૈ ।
આકાશસ્ય ન ભેદોઽસ્તિ તદ્વજ્જીવેષુ નિર્ણયઃ ॥ ૬॥

નાઽઽકાશસ્ય ઘટાકાશો વિકારાવયવૌ યથા ।
નૈવાઽઽત્મનઃ સદા જીવો વિકારાવયવૌ તથા ॥ ૭॥

યથા ભવતિ બાલાનાં ગગનં મલિનં મલૈઃ ।
તથા ભવત્યબુદ્ધાનામાત્માઽપિ મલિનો મલૈઃ ॥ ૮॥

મરણે સમ્ભવે ચૈવ ગત્યાગમનયોરપિ ।
સ્થિતૌ સર્વશરીરેષુ આકાશેનાવિલક્ષણઃ ॥ ૯॥

સઙ્ઘાતાઃ સ્વપ્નવત્સર્વે આત્મમાયાવિસર્જિતાઃ ।
આધિક્યે સર્વસામ્યે વા નોપપત્તિર્હિ વિદ્યતે ॥ ૧૦॥

રસાદયો હિ યે કોશા વ્યાખ્યાતાસ્તૈત્તિરીયકે ।
તેષામાત્મા પરો જીવઃ ખં યથા સમ્પ્રકાશિતઃ ॥ ૧૧॥

દ્વયોર્દ્વયોર્મધુજ્ઞાને પરં બ્રહ્મ પ્રકાશિતમ્ ।
પૃથિવ્યામુદરે ચૈવ યથાઽઽકાશઃ પ્રકાશિતઃ ॥ ૧૨॥

જીવાત્મનોરનન્યત્વમભેદેન પ્રશસ્યતે ।
નાનાત્વં નિન્દ્યતે યચ્ચ તદેવં હિ સમઞ્જસમ્ ॥ ૧૩॥

જીવાત્મનોઃ પૃથક્ત્વં યત્પ્રાગુત્પત્તેઃ પ્રકીર્તિતમ્ ।
ભવિષ્યદ્વૃત્ત્યા ગૌણં તન્મુખ્યત્વં હિ ન યુજ્યતે ॥ ૧૪॥

મૃલ્લોહવિસ્ફુલિઙ્ગાદ્યૈ સૃષ્ટિર્યા ચોદિતાઽન્યથા ।
ઉપાયઃ સોઽવતારાય નાસ્તિ ભેદઃ કથઞ્ચન ॥ ૧૫॥

આશ્રમાસ્ત્રિવિધા હીનમધ્યમોત્કૃષ્ટદૃષ્ટયઃ ।
ઉપાસનોપદિષ્ટેયં તદર્થમનુકમ્પયા ॥ ૧૬॥

સ્વસિદ્ધાન્તવ્યવસ્થાસુ દ્વૈતિનો નિશ્ચિતા દૃઢમ્ ।
પરસ્પરં વિરુધ્યન્તે તૈરયં ન વિરુધ્યતે ॥ ૧૭॥

અદ્વૈતં પરમાર્થો હિ દ્વૈતં તદ્ભેદ ઉચ્યતે ।
તેષામુભયથા દ્વૈતં તેનાયં ન વિરુધ્યતે ॥ ૧૮॥

માયયા ભિદ્યતે હ્યેતન્નાન્યથાઽજં કથઞ્ચન ।
તત્ત્વતો ભિદ્યમાને હિ મર્ત્યતામમૃતં વ્રજેત્ ॥ ૧૯॥

અજાતસ્યૈવ ભાવસ્ય જાતિમિચ્છન્તિ વાદિનઃ ।
અજાતો હ્યમૃતો ભાવો મર્ત્યતાં કથમેષ્યતિ ॥ ૨૦॥

ન ભવત્યમૃતં મર્ત્યં ન મર્ત્યમમૃતં તથા ।
પ્રકૃતેરન્યથાભાવો ન કથઞ્ચિદ્ભવિષ્યતિ ॥ ૨૧॥

સ્વભાવેનામૃતો યસ્ય ભાવો ગચ્છતિ મર્ત્યતામ્ ।
કૃતકેનામૃતસ્તસ્ય કથં સ્થાસ્યતિ નિશ્ચલઃ ॥ ૨૨॥

ભૂતતોઽભૂતતો વાઽપિ સૃજ્યમાને સમા શ્રુતિઃ ।
નિશ્ચિતં યુક્તિયુક્તં ચ યત્તદ્ભવતિ નેતરત્ ॥ ૨૩॥

નેહ નાનેતિ ચાઽઽમ્નાયાદિન્દ્રો માયાભિરિત્યપિ ॥

અજાયમાનો બહુધા માયયા જાયતે તુ સઃ ॥ ૨૪॥

સમ્ભૂતેરપવાદાચ્ચ સમ્ભવઃ પ્રતિષિધ્યતે ।
કો ન્વેનં જનયેદિતિ કારણં પ્રતિષિધ્યતે ॥ ૨૫॥

સ એષ નેતિ નેતીતિ વ્યાખ્યાતં નિહ્નુતે યતઃ ।
સર્વમગ્રાહ્યભાવેન હેતુનાઽજં પ્રકાશતે ॥ ૨૬॥

સતો હિ માયયા જન્મ યુજ્યતે ન તુ તત્ત્વતઃ ।
તત્ત્વતો જાયતે યસ્ય જાતં તસ્ય હિ જાયતે ॥ ૨૭॥

અસતો માયયા જન્મ તત્ત્વતો નૈવ યુજ્યતે ।

વન્ધ્યાપુત્રો ન તત્ત્વેન માયયા વાઽપિ જાયતે ॥ ૨૮॥

યથા  સ્વપ્ને દ્વયાભાસં સ્પન્દતે માયયા મનઃ ।
તથા જાગ્રદ્વ્યાભાસં સ્પન્દતે માયયા મનઃ ॥ ૨૯॥

અદ્વયં ચ દ્વયાભાસં મનઃ સ્વપ્ને ન સંશયઃ ।
અદ્વયં ચ દ્વયાભાસં તથા જાગ્રન્ન સંશયઃ ॥ ૩૦॥

મનોદૃશ્યમિદં દ્વૈતં યત્કિઞ્ચિત્સચરાચરમ્ ।
મનસો હ્યમનીભાવે દ્વૈતં નૈવોપલભ્યતે ॥ ૩૧॥

આત્મસત્યાનુબોધેન ન સઙ્કલ્પયતે યદા ।
અમનસ્તાં તદા યાતિ ગ્રાહ્યાભાવે તદગ્રહમ્ ॥ ૩૨॥

અકલ્પકમજં જ્ઞાનં જ્ઞેયાભિન્નં પ્રચક્ષતે ।
બ્રહ્મજ્ઞેયમજં નિત્યમજેનાજં વિબુધ્યતે ॥ ૩૩॥

નિગૃહીતસ્ય મનસો નિર્વિકલ્પસ્ય ધીમતઃ ।
પ્રચારઃ સ તુ વિજ્ઞેયઃ સુષુપ્તેઽન્યો ન તત્સમઃ ॥ ૩૪॥

લીયતે હિ સુષુપ્તે તન્નિગૃહીતં ન લીયતે ।
તદેવ નિર્ભયં બ્રહ્મ જ્ઞાનાલોકં સમન્તતઃ ॥ ૩૫॥

અજમનિદ્રમસ્વપ્નમનામકમરૂપકમ્ ।
સકૃદ્વિભાતં સર્વજ્ઞં નોપચારઃ કથઞ્ચન ॥ ૩૬॥

સર્વાભિલાપવિગતઃ સર્વચિન્તાસમુત્થિતઃ ।
સુપ્રશાન્તઃ સકૃજ્જ્યોતિઃ સમાધિરચલોઽભયઃ ॥ ૩૭॥

ગ્રહો ન તત્ર નોત્સર્ગશ્ચિન્તા યત્ર ન વિદ્યતે ।
આત્મસંસ્થં તદા જ્ઞાનમજાતિ સમતાં ગતમ્ ॥ ૩૮॥

અસ્પર્શયોગો વૈ નામ દુર્દર્શઃ સર્વયોગિભિઃ ।
યોગિનો બિભ્યતિ હ્યસ્માદભયે ભયદર્શિનઃ ॥ ૩૯॥

મનસો નિગ્રહાયત્તમભયં સર્વયોગિનામ્ ।
દુઃખક્ષયઃ પ્રબોધશ્ચાપ્યક્ષયા શાન્તિરેવ ચ ॥ ૪૦॥

ઉત્સેક ઉદધેર્યદ્વત્કુશાગ્રેણૈકબિન્દુના ।
મનસો નિગ્રહસ્તદ્વદ્ભવેદપરિખેદતઃ ॥ ૪૧॥

ઉપાયેન નિગૃહ્ણીયાદ્વિક્ષિપ્તં કામભોગયોઃ ।
સુપ્રસન્નં લયે ચૈવ યથા કામો લયસ્તથા ॥ ૪૨॥

દુઃખં સર્વમનુસ્મૃત્ય કામભોગાન્નિવર્તયેત્ ।
અજં સર્વમનુસ્મૃત્ય જાતં નૈવ તુ પશ્યતિ ॥ ૪૩॥

લયે સમ્બોધયેચ્ચિત્તં વિક્ષિપ્તં શમયેત્પુનઃ ।
સકષાયં વિજાનીયાત્સમપ્રાપ્તં ન ચાલયેત્ ॥ ૪૪॥

નાऽऽસ્વાદયેત્સુખં તત્ર નિઃસઙ્ગઃ પ્રજ્ઞયા ભવેત્ ।
નિશ્ચલં નિશ્ચરચ્ચિત્તમેકી કુર્યાત્પ્રયત્નતઃ ॥ ૪૫॥

યદા ન લીયતે ચિત્તં ન ચ વિક્ષિપ્યતે પુનઃ ।
અનિઙ્ગનમનાભાસં નિષ્પન્નં બ્રહ્મ તત્તદા ॥ ૪૬॥

સ્વસ્થં શાન્તં સનિર્વાણમકથ્યં સુખમુત્તમમ્ ।
અજમજેન જ્ઞેયેન સર્વજ્ઞં પરિચક્ષત ॥ ૪૭॥

ન કશ્ચિજ્જાયતે જીવઃ સમ્ભવોऽસ્ય ન વિદ્યતે ।
એતત્તદુત્તમં સત્યં યત્ર કિઞ્ચિન્ન જાયતે ॥ ૪૮॥

ઇતિ ગૌડપાદિયકારિકાયામદ્વૈતાખ્યં તૃતીયં
પ્રકરણમ્ ॥ ૩॥ ૐ તત્સત્ ॥

જ્ઞાનેનાऽऽકાશકલ્પેન ધર્માન્યો ગગનોપમાન્ ।
જ્ઞેયાભિન્નેન સમ્બુદ્ધસ્તં વન્દે દ્વિપદાં વરમ્ ॥ ૧॥

અસ્પર્શયોગો વૈ નામ સર્વસત્ત્વસુખો હિતઃ ।
અવિવાદોऽવિરુદ્ધશ્ચ દેશિતસ્તં નમામ્યહમ્ ॥ ૨॥

ભૂતસ્ય જાતિમિચ્છન્તિ વાદિનઃ કેચિદેવ હિ ।
અભૂતસ્યાપરે ધીરા વિવદન્તઃ પરસ્પરમ્ ॥ ૩॥

ભૂતં ન જાયતે કિઞ્ચિદભૂતં નૈવ જાયતે ।
વિવદન્તો દ્વયા હ્યેવમજાતિં ખ્યાપયન્તિ તે ॥ ૪॥

ખ્યાપ્યમાનામજાતિં તૈરનુમોદામહે વયમ્ ।
વિવદામો ન તૈઃ સાર્ધમવિવાદં નિબોધત ॥ ૫॥

અજાતસ્યૈવ ધર્મસ્ય જાતિમિચ્છન્તિ વાદિનઃ ।
અજાતો હ્યમૃતો ધર્મો મર્ત્યતાં કથમેષ્યતિ ॥ ૬॥

ન ભવત્યમૃતં મર્ત્યં ન મર્ત્યમમૃતં તથા ।
પ્રકૃતેરન્યથાભાવો ન કથઞ્ચિદ્ભવિષ્યતિ ॥ ૭॥

સ્વભાવેનામૃતો યસ્ય ધર્મો ગચ્છતિ મર્ત્યતામ્ ।
કૃતકેનામૃતસ્તસ્ય કથં સ્થાસ્યતિ નિશ્ચલઃ ॥ ૮॥

સાંસિદ્ધિકી સ્વાભાવિકી સહજા અકૃતા ચ યા ।
પ્રકૃતિઃ સેતિ વિજ્ઞેયા સ્વભાવં ન જહાતિ યા ॥ ૯॥

જરામરણનિર્મુક્તાઃ સર્વે ધર્માઃ સ્વભાવતઃ ।
જરામરણમિચ્છન્તશ્ચ્યવન્તે તન્મનીષયા ॥ ૧૦॥

કારણં યસ્ય વૈ કાર્યં કારણં તસ્ય જાયતે ।
જાયમાનં કથમજં ભિન્નં નિત્યં કથં ચ તત્ ॥ ૧૧॥

કારણાદ્યદ્યનન્યત્વમતઃ કાર્યમજં યદિ ।
જાયમાનાદ્ધિ વૈ કાર્યાત્કારણં તે કથં ધ્રુવમ્ ॥ ૧૨॥

અજાદ્વૈ જાયતે યસ્ય દૃષ્ટાન્તસ્તસ્ય નાસ્તિ વૈ ।
જાતાચ્ચ જાયમાનસ્ય ન વ્યવસ્થા પ્રસજ્યતે ॥ ૧૩॥

હેતોરાદિઃ ફલં યેષામાદિર્હેતુઃ ફલસ્ય ચ ।
હેતોઃ ફલસ્ય ચાનાદિઃ કથં તૈરુપવર્ણ્યતે ॥ ૧૪॥

હેતોરાદિઃ ફલં યેષામાદિર્હેતુઃ ફલસ્ય ચ ।
તથા જન્મ ભવેત્તેષાં પુત્રાજ્જન્મ પિતુર્યથા ॥ ૧૫॥

સમ્ભવે હેતુફલયોરેષિતવ્યઃ ક્રમસ્ત્વયા ।
યુગપત્સમ્ભવે યસ્માદસમ્બન્ધો વિષાણવત્ ॥ ૧૬॥

ફલાદુત્પદ્યમાનઃ સન્ન તે હેતુઃ પ્રસિધ્યતિ ।
અપ્રસિદ્ધઃ કથં હેતુઃ ફલમુત્પાદયિષ્યતિ ॥ ૧૭॥

યદિ હેતોઃ ફલાત્સિદ્ધિઃ ફલસિદ્ધિશ્ચ હેતુતઃ ।
કતરત્પૂર્વનિષ્પન્નં યસ્ય સિદ્ધિરપેક્ષયા ॥ ૧૮॥

અશક્તિરપરિજ્ઞાનં ક્રમકોપોઽથ વા પુનઃ ।
એવં હિ સર્વથા બુદ્ધૈરજાતિઃ પરિદીપિતા ॥ ૧૯॥

બીજાઙ્કુરાખ્યો દૃષ્ટાન્તઃ સદા સાધ્યસમો હિ સઃ ।

ન હિ સાધ્યસમો હેતુઃ સિદ્ધૌ સાધ્યસ્ય યુજ્યતે ॥ ૨૦॥

પૂર્વાપરાપરિજ્ઞાનમજાતેઃ પરિદીપકમ્ ।
જાયમાનાદ્ધિ વૈ ધર્માત્કથં પૂર્વં ન ગૃહ્યતે ॥ ૨૧॥

સ્વતો વા પરતો વાઽપિ ન કિઞ્ચિદ્વસ્તુ જાયતે ।
સદસત્સદસદ્વાઽપિ ન કિઞ્ચિદ્વસ્તુ જાયતે ॥ ૨૨॥

હેતુર્ન જાયતેઽનાદેઃ ફલં ચાપિ સ્વભાવતઃ ।
આદિર્ન વિદ્યતે યસ્ય તસ્ય હ્યાદિર્ન વિદ્યતે ॥ ૨૩॥

પ્રજ્ઞપ્તેઃ સનિમિત્તત્વમન્યથા દ્વયનાશતઃ ।
સઙ્ક્લેશસ્યોપલબ્ધેશ્ચ પરતન્ત્રાસ્તિતા મતા ॥ ૨૪॥

પ્રજ્ઞપ્તેઃ સનિમિત્તત્વમિષ્યતે યુક્તિદર્શનાત્ ।
નિમિત્તસ્યાનિમિત્તત્વમિષ્યતે ભૂતદર્શનાત્ ॥ ૨૫॥

ચિત્તં ન સંસ્પૃશત્યર્થં નાર્થાભાસં તથૈવ ચ ।
અભૂતો હિ યતશ્ચાર્થો નાર્થાભાસસ્તતઃ પૃથક્ ॥ ૨૬॥

નિમિત્તં ન સદા ચિત્તં સંસ્પૃશત્યધ્વસુ ત્રિષુ ।
અનિમિત્તો વિપર્યાસઃ કથં તસ્ય ભવિષ્યતિ ॥ ૨૭॥

તસ્માન્ન જાયતે ચિત્તં ચિત્તદૃશ્યં ન જાયતે ।
તસ્ય પશ્યન્તિ યે જાતિં ખે વૈ પશ્યન્તિ તે પદમ્ ॥ ૨૮॥

અજાતં જાયતે યસ્માદજાતિઃ પ્રકૃતિસ્તતઃ ।
પ્રકૃતેરન્યથાભાવો ન કથઞ્ચિદ્ભવિષ્યતિ ॥ ૨૯॥

અનાદેરન્તવત્ત્વં ચ સંસારસ્ય ન સેત્સ્યતિ ।
અનન્તતા ચાઽઽદિમતો મોક્ષસ્ય ન ભવિષ્યતિ ॥ ૩૦॥

આદાવન્તે ચ યન્નાસ્તિ વર્તમાનેઽપિ તત્તથા ।
વિતથૈઃ સદૃશાઃ સન્તોઽવિતથા ઇવ લક્ષિતાઃ ॥ ૩૧॥

સપ્રયોજનતા તેષાં સ્વપ્ને વિપ્રતિપદ્યતે ।
તસ્માદાદ્યન્તવત્ત્વેન મિથ્યૈવ ખલુ તે સ્મૃતાઃ ॥ ૩૨॥

સર્વે ધર્મા મૃષા સ્વપ્ને કાયસ્યાન્તર્નિદર્શનાત્ ।
સંવૃતેઽસ્મિન્પ્રદેશે વૈ ભૂતાનાં દર્શનં કુતઃ ॥ ૩૩॥

ન યુક્તં દર્શનં ગત્વા કાલસ્યાનિયમાદ્ગતૌ ।
પ્રતિબુદ્ધશ્ચ વૈ સર્વસ્તસ્મિન્દેશે ન વિદ્યતે ॥ ૩૪॥

મિત્રાદ્યૈઃ સહ સંમન્ત્ર્ય સમ્બુદ્ધો ન પ્રપદ્યતે ।
ગૃહીતં ચાપિ યત્કિઞ્ચિત્પ્રતિબુદ્ધો ન પશ્યતિ ॥ ૩૫॥

સ્વપ્ને ચાવસ્તુકઃ કાયઃ પૃથગન્યસ્ય દર્શનાત્ ।
યથા કાયસ્તથા સર્વં ચિત્તદૃશ્યમવસ્તુકમ્ ॥ ૩૬॥

ગ્રહણાજ્જાગરિતવત્તદ્ધેતુઃ સ્વપ્ન ઇષ્યતે ।
તદ્ધેતુત્વાત્તુ તસ્યૈવ સજ્જાગરિતમિષ્યતે ॥ ૩૭॥

ઉત્પાદસ્યાપ્રસિદ્ધત્વાદજં સર્વમુદાહૃતમ્ ।
ન ચ ભૂતાદભૂતસ્ય સમ્ભવોઽસ્તિ કથઞ્ચન ॥ ૩૮॥

અસજ્જાગરિતે દૃષ્ટ્વા સ્વપ્ને પશ્યતિ તન્મયઃ ।
અસત્સ્વપ્નેઽપિ દૃષ્ટ્વા ચ પ્રતિબુદ્ધો ન પશ્યતિ ॥ ૩૯॥

નાસ્ત્યસદ્ધેતુકમસત્સદસદ્ધેતુકં તથા ।
સચ્ચ સદ્ધેતુકં નાસ્તિ સદ્ધેતુકમસત્કુતઃ ॥ ૪૦॥

વિપર્યાસાદ્યથા જાગ્રદચિન્ત્યાન્ભૂતવત્સ્પૃશેત્ ।
તથા સ્વપ્ને વિપર્યાસાત્ ધર્માંસ્તત્રૈવ પશ્યતિ ॥ ૪૧॥

ઉપલમ્ભાત્સમાચારાદસ્તિવસ્તુત્વવાદિનામ્ ।
જાતિસ્તુ દેશિતા બુદ્ધૈઃ અજાતેસ્ત્રસતાં સદા ॥ ૪૨॥

અજાતેસ્ત્રસતાં તેષામુપલમ્ભાદ્વિયન્તિ યે ।
જાતિદોષા ન સેત્સ્યન્તિ દોષોઽપ્યલ્પો ભવિષ્યતિ ॥ ૪૩॥

ઉપલમ્ભાત્સમાચારાન્માયાહસ્તી યથોચ્યતે ।
ઉપલમ્ભાત્સમાચારાદસ્તિ વસ્તુ તથોચ્યતે ॥ ૪૪॥

જાત્યાભાસં ચલાભાસં વસ્ત્વાભાસં તથૈવ ચ ।
અજાચલમવસ્તુત્વં વિજ્ઞાનં શાન્તમદ્વયમ્ ॥ ૪૫॥

એવં ન જાયતે ચિત્તમેવંધર્મા અજાઃ સ્મૃતાઃ ।
એવમેવ વિજાનન્તો ન પતન્તિ વિપર્યતે ॥ ૪૬॥

ઋજુવક્રાદિકાભાસમલાતસ્પન્દિતં યથા ।
ગ્રહણગ્રાહકાભાસં વિજ્ઞાનસ્પન્દિતં તથા ॥ ૪૭॥

અસ્પન્દમાનમલાતમનાભાસમજં યથા ।
અસ્પન્દમાનં વિજ્ઞાનમનાભાસમજં તથા ॥ ૪૮॥

અલાતે સ્પન્દમાને વૈ નાઽઽભાસા અન્યતોભુવઃ ।
ન તતોઽન્યત્ર નિસ્પન્દાન્નાલાતં પ્રવિશન્તિ તે ॥ ૪૯॥

ન નિર્ગતા અલાતાત્તે દ્રવ્યત્વાભાવયોગતઃ ।
વિજ્ઞાનેઽપિ તથૈવ સ્યુરાભાસસ્યાવિશેશતઃ ॥ ૫૦॥

વિજ્ઞાને સ્પન્દમાને વૈ નાઽઽભાસા અન્યતોભુવઃ ।
ન તતોઽન્યત્ર નિસ્પન્દાન્ન વિજ્ઞાનં વિશન્તિ તે ॥ ૫૧॥

ન નિર્ગતાસ્તે વિજ્ઞાનાદ્દ્રવ્યત્વાભાવયોગતઃ ।
કાર્યકારણતાભાવાદ્યતોઽચિન્ત્યાઃ સદૈવ તે ॥ ૫૨॥

દ્રવ્યં દ્રવ્યસ્ય હેતુઃ સ્યાદન્યદન્યસ્ય ચૈવ હિ ।
દ્રવ્યત્વમન્યભાવો વા ધર્માણાં નોપપદ્યતે ॥ ૫૩॥

એવં ન ચિત્તજા ધર્માશ્ચિત્તં વાઽપિ ન ધર્મજમ્ ।
એવં હેતુફલાજાતિં પ્રવિશન્તિ મનીષિણઃ ॥ ૫૪॥

યાવદ્ધેતુફલાવેશસ્તાવદ્ધેતુફલોદ્ભવઃ ।
ક્ષીણે હેતુફલાવેશે નાસ્તિ હેતુફલોદ્ભવઃ ॥ ૫૫॥

યાવદ્ધેતુફલાવેશઃ સંસારસ્તાવદાયતઃ ।
ક્ષીણે હેતુફલાવેશે સંસારં ન પ્રપદ્યતે ॥ ૫૬॥

સંવૃત્યા જાયતે સર્વં શાશ્વતં નાસ્તિ તેન વૈ ।
સદ્ભાવેન હ્યજં સર્વમુચ્છેદસ્તેન નાસ્તિ વૈ ॥ ૫૭॥

ધર્મા ય ઇતિ જાયન્તે જાયન્તે તે ન તત્ત્વતઃ ।
જન્મ માયોપમં તેષાં સા ચ માયા ન વિદ્યતે ॥ ૫૮॥

યથા માયામયાદ્બીજાજ્જાયતે તન્મયોઽઙ્કુરઃ ।
નાસૌ નિત્યો ન ચોચ્છેદી તદ્વદ્ધર્મેષુ યોજના ॥ ૫૯॥

નાજેષુ સર્વધર્મેષુ શાશ્વતાશાશ્વતાભિધા ।
યત્ર વર્ણા ન વર્તન્તે વિવેકસ્તત્ર નોચ્યતે ॥ ૬૦॥

યથા સ્વપ્ને દ્વયાભાસં ચિત્તં ચલતિ માયયા ।

તથા જાગ્રદ્વયાભાસં ચિત્તં ચલતિ માયયા ॥ ૬૧॥

અદ્વયં ચ દ્વયાભાસં ચિત્તં સ્વપ્ને ન સંશયઃ ।
અદ્વયં ચ દ્વયાભાસં તથા જાગ્રન્ન સંશયમ્ ॥ ૬૨॥

સ્વપ્નદૃક્પ્રચરન્સ્વપ્ને દિક્ષુ વૈ દશસુ સ્થિતાન્ ।
અણ્ડજાન્સ્વેદજાન્વાऽપિ જીવાન્પશ્યતિ યાન્સદા ॥ ૬૩॥

સ્વપ્નદૃક્ચિત્તદૃશ્યાસ્તે ન વિદ્યન્તે તતઃ પૃથક્ ।
તથા તદ્દૃશ્યમેવેદં સ્વપ્નદૃક્ચિત્તમિષ્યતે ॥ ૬૪॥

ચરઞ્જાગરિતે જાગ્રદ્દિક્ષુ વૈ દશસુ સ્થિતાન્ ।
અણ્ડજાન્સ્વેદજાન્વાऽપિ જીવાન્પશ્યતિ યાન્સદા ॥ ૬૫॥

જાગ્રચ્ચિત્તેક્ષણીયાસ્તે ન વિદ્યન્તે તતઃ પૃથક્ ।
તથા તદ્દૃશ્યમેવેદં જાગ્રતશ્ચિત્તમિષ્યતે ॥ ૬૬॥

ઉભે હ્યન્યોન્યદૃશ્યે તે કિં તદસ્તીતિ નોચ્યતે ।
લક્ષણાશૂન્યમુભયં તન્મતેનૈવ ગૃહ્યતે ॥ ૬૭॥

યથા સ્વપ્નમયો જીવો જાયતે મ્રિયતેऽપિ ચ ।
તથા જીવા અમી સર્વે ભવન્તિ ન ભવન્તિ ચ ॥ ૬૮॥

યથા માયામયો જીવો જાયતે મ્રિયતેऽપિ ચ ।
તથા જીવા અમી સર્વે ભવન્તિ ન ભવન્તિ ચ ॥ ૬૯॥

યથા નિર્મિતકો જીવો જાયતે મ્રિયતેऽપિ વા ।
તથા જીવા અમી સર્વે ભવન્તિ ન ભવન્તિ ચ ॥ ૭૦॥

ન કશ્ચિજ્જાયતે જીવઃ સમ્ભવોऽસ્ય ન વિદ્યતે ।
એતત્તદુત્તમં સત્યં યત્ર કિઞ્ચિન્ન જાયતે ॥ ૭૧॥

ચિત્તસ્પન્દિતમેવેદં ગ્રાહ્યગ્રાહકવદ્દ્વયમ્ ।
ચિત્તં નિર્વિષયં નિત્યમસઙ્ગં તેન કીર્તિતમ્ ॥ ૭૨॥

યોऽસ્તિ કલ્પિતસંવૃત્યા પરમાર્થેન નાસ્ત્યસૌ ।
પરતન્ત્રાભિસંવૃત્યા સ્યાન્નાસ્તિ પરમાર્થતઃ ॥ ૭૩॥

અજઃ કલ્પિતસંવૃત્યા પરમાર્થેન નાપ્યજઃ ।
પરતન્ત્રાભિનિષ્પત્ત્યા સંવૃત્યા જાયતે તુ સઃ ॥ ૭૪॥

અભૂતાભિનિવેશોઽસ્તિ દ્વયં તત્ર ન વિદ્યતે ।
દ્વયાભાવં સ બુદ્ધ્વૈવ નિર્નિમિત્તો ન જાયતે ॥ ૭૫॥

યદા ન લભતે હેતૂનુત્તમાધમમધ્યમાન્ ।
તદા ન જાયતે ચિત્તં હેત્વભાવે ફલં કુતઃ ॥ ૭૬॥

અનિમિત્તસ્ય ચિત્તસ્ય યાઽનુત્પત્તિઃ સમાઽદ્વયા ।
અજાતસ્યૈવ સર્વસ્ય ચિત્તદૃશ્યં હિ તદ્યતઃ ॥ ૭૭॥

બુધ્દ્વાઽનિમિત્તતાં સત્યાં હેતું પૃથગનાપ્નુવન્ ।
વીતશોકં તથા કામમભયં પદમશ્નુતે ॥ ૭૮॥

અભૂતાભિનિવેશાદ્ધિ સદૃશે તત્પ્રવર્તતે ।
વસ્ત્વભાવં સ બુદ્ધ્વૈવ નિઃસઙ્ગં વિનિવર્તતે ॥ ૭૯॥

નિવૃત્તસ્યાપ્રવૃત્તસ્ય નિશ્ચલા હિ તદા સ્થિતિઃ ।
વિષયઃ સ હિ બુદ્ધાનાં તત્સામ્યમજમદ્વયમ્ ॥ ૮૦॥

અજમનિદ્રમસ્વપ્નં પ્રભાતં ભવતિ સ્વયમ્ ।
સકૃદ્વિભાતો હ્યેવૈષ ધર્મો ધાતુસ્વભાવતઃ ॥ ૮૧॥

સુખમાવ્રિયતે નિત્યં દુઃખં વિવ્રિયતે સદા ।
યસ્ય કસ્ય ચ ધર્મસ્ય ગ્રહેણ ભગવાનસૌ ॥ ૮૨॥

અસ્તિ નાસ્ત્યસ્તિ નાસ્તીતિ નાસ્તિ નાસ્તીતિ વા પુનઃ ।
ચલસ્થિરોભયાભાવૈરાવૃણોત્યેવ બાલિશઃ ॥ ૮૩॥

કોટ્યશ્ચતસ્ર એતાસ્તુ ગ્રહૈર્યાસાં સદાઽઽવૃતઃ ।
ભગવાનાભિરસ્પૃષ્ટો યેન દૃષ્ટઃ સ સર્વદૃક્ ॥ ૮૪॥

પ્રાપ્ય સર્વજ્ઞતાં કૃત્સ્નાં બ્રાહ્મણ્યં પદમદ્વયમ્ ।
અનાપન્નાદિમધ્યાન્તં કિમતઃ પરમીહતે ॥ ૮૫॥

વિપ્રાણાં વિનયો હ્યેષ શમઃ પ્રાકૃત ઉચ્યતે ।
દમઃ પ્રકૃતિદાન્તત્વાદેવં વિદ્વાઞ્શમં વ્રજેત્ ॥ ૮૬॥

સવસ્તુ સોપલમ્ભં ચ દ્વયં લૌકિકમિષ્યતે ।
અવસ્તુ સોપલમ્ભં ચ શુદ્ધં લૌકિકમિષ્યતે ॥ ૮૭॥

અવસ્ત્વનુપલમ્ભં ચ લોકોત્તરમિતિ સ્મૃતમ્ ।
જ્ઞાનં જ્ઞેયં ચ વિજ્ઞેયં સદા બુદ્ધૈઃ પ્રકીર્તિતમ્ ॥ ૮૮॥

જ્ઞાને ચ ત્રિવિધે જ્ઞેયે ક્રમેણ વિદિતે સ્વયમ્ ।
સર્વજ્ઞતા હિ સર્વત્ર ભવતીહ મહાધિયઃ ॥ ૮૯ ॥

હેયજ્ઞેયાપ્યપાક્યાનિ વિજ્ઞેયાન્યગ્રયાણતઃ ।
તેષામન્યત્ર વિજ્ઞેયાદુપલમ્ભસ્ત્રિષુ સ્મૃતઃ ॥ ૯૦ ॥

પ્રકૃત્યાऽऽકાશવજ્જ્ઞેયાઃ સર્વે ધર્મા અનાદયઃ ।
વિદ્યતે ન હિ નાનાત્વં તેષાં ક્વચન કિઞ્ચન ॥ ૯૧ ॥

આદિબુદ્ધાઃ પ્રકૃત્યૈવ સર્વે ધર્માઃ સુનિશ્ચિતાઃ ।
યસ્યૈવં ભવતિ ક્ષાન્તિઃ સોऽમૃતત્વાય કલ્પતે ॥ ૯૨ ॥

આદિશાન્તા હ્યનુત્પન્નાઃ પ્રકૃત્યૈવ સુનિર્વૃતાઃ ।
સર્વે ધર્માઃ સમાભિન્ના અજં સામ્યં વિશારદમ્ ॥ ૯૩ ॥

વૈશારદ્યં તુ વૈ નાસ્તિ ભેદે વિચરતાં સદા ।
ભેદનિમ્નાઃ પૃથગ્વાદાસ્તસ્માત્તે કૃપણાઃ સ્મૃતાઃ ॥ ૯૪ ॥

અજે સામ્યે તુ યે કેચિદ્ભવિષ્યન્તિ સુનિશ્ચિતાઃ ।
તે હિ લોકે મહાજ્ઞાનાસ્તચ્ચ લોકો ન ગાહતે ॥ ૯૫ ॥

અજેષ્વજમસઙ્ક્રાન્તં ધર્મેષુ જ્ઞાનમિષ્યતે ।
યતો ન ક્રમતે જ્ઞાનમસઙ્ગં તેન કીર્તિતમ્ ॥ ૯૬ ॥

અણુમાત્રેऽપિ વૈધર્મ્યે જાયમાનેऽવિપશ્ચિતઃ ।
અસઙ્ગતા સદા નાસ્તિ કિમુતાऽऽવરણચ્યુતિઃ ॥ ૯૭ ॥

અલબ્ધાવરણાઃ સર્વે ધર્માઃ પ્રકૃતિનિર્મલાઃ ।
આદૌ બુદ્ધાસ્તથા મુક્તા બુધ્યન્ત ઇતિ નાયકાઃ ॥ ૯૮ ॥

ક્રમતે ન હિ બુદ્ધસ્ય જ્ઞાનં ધર્મેષુ તાયિનઃ ।
સર્વે ધર્માસ્તથા જ્ઞાનં નૈતદ્બુદ્ધેન ભાષિતમ્ ॥ ૯૯ ॥

દુર્દર્શમતિગમ્ભીરમજં સામ્યં વિશારદમ્ ।
બુદ્ધ્વા પદમનાનાત્વં નમસ્કુર્મો યથાબલમ્ ॥ ૧૦૦ ॥

ઇતિ ગૌડપાદાચાર્યકૃતા માણ્ડૂક્યોપનિષત્કારિકાઃ સમ્પૂર્ણાઃ ॥

ૐ તત્સત્ ॥

Transliterated by : Anshuman Pandey M. Giridhar Kim Poulsen
Proofread by Aikya Param, David Lyttle

*Mandukyopanishat with Karika by Gaudapada*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*